# Devaih Kritam Nrisimha Stotram

# देवैः कृतं नृसिंहस्तोत्रम्

## Document Information

Text title : Devaih Kritam Nrisimha Stotram

File name : devaiHkRRitaMnRRisiMhastotram.itx

Category : vishhnu, vishnu, lingapurANa, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lingapurANa | pUrvabhAga | adhyAya 95/22-30||

Latest update : October 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 8, 2024

*sanskritdocuments.org*

# देवैः कृतं नृसिंहस्तोत्रम्

तं तुष्टुवुः सुरश्रेष्ठा लोका लोकाचले स्थिताः ।
सब्रह्मकाः ससाध्याश्च सयमाः समरुद्गणाः ॥ २१॥

परात्परतरं ब्रह्म तत्त्वात्तत्त्वतमं भवान् ।
ज्योतिषां तु परञ्ज्योतिः परमात्मा जगन्मयः ॥ २२॥

स्थूलं सूक्ष्मं सुसूक्ष्मं च शब्दब्रह्ममयः शुभः ।
वागतीतो निरालम्बो निर्द्वन्द्वो निरुपप्लवः ॥ २३॥

यज्ञभुग्यज्ञमूर्तिस्त्वं यज्ञिनां फलदः प्रभुः ।
भवान्मत्स्याकृतिः कौर्ममास्थाय जगति स्थितः ॥ २४॥

वाराहिं चैव तां सैंहीमास्थायेह व्यवस्थितः ।
देवानां देवरक्षार्थं निहत्य दितिजेश्वरम् ॥ २५॥

द्विजशापच्छलेनैवमवतीर्णोऽसि लीलया ।
न दृष्टं यत्त्वदन्यं हि भवान्सर्वश्चराचरम् ॥ २६॥

भवान्विष्णुर्भवान् रुद्रो भवानेव पितामहः ।
भवानादिर्भवानन्तो भवानेव वयं विभो ॥ २७॥

भवानेव जगत्सर्वं प्रलापेन किमीश्वर ।
मायया बहुधा संस्थमद्वितीयमयं प्रभो ॥ २८॥

स्तोष्यामस्त्वां कथं भासि देवदेव मृगाधिप ।
स्तुतोऽपि विविधैः स्तुत्यैर्भावैर्नानाविधैः प्रभुः ॥ २९॥

न जगाम द्विजाः शान्तिं मानयन्योनिमात्मनः ।
यो नृसिंहस्तवं भक्त्या पठेद्वार्थं विचारयेत् ॥ ३०॥

श्रावयेद्वा द्विजान्सर्वान् विष्णुलोके महीयते ।
तदन्तरे शिवं देवाः सेन्द्राः सब्रह्मकाः प्रभुम् ॥ ३१॥

सम्प्राप्य तुष्टवुः सर्वं विज्ञाप्य मृगरूपिणः ।
ततो ब्रह्मादयस्तूर्णं संस्तूय परमेश्वरम् ॥ ३२॥

आत्मत्राणाय शरणं जग्मुः परमकारणम् ।
मन्दरस्थं महादेवं क्रीडमानं सहोमया ॥ ३३॥

सेवितं गणगन्धर्वैः सिद्धैरप्सरसां गणैः ।
देवताभिः सह ब्रह्मा भीतभीतः सगद्गदम् ।
प्रणम्य दण्डवद्भूमौ तुष्टाव परमेश्वरम् ॥ ३४॥

ब्रह्मोवाच ।
नमस्ते कालकालाय नमस्ते रुद्र मन्यवे ।
नमः शिवाय रुद्राय शङ्कराय शिवाय ते ॥ ३५॥

उग्रोऽसि सर्वभूतानां नियन्तासि शिवोऽसि नः ।
नमः शिवाय शर्वाय शङ्करायार्त्तिहारिणे ॥ ३६॥

मयस्कराय विश्वाय विष्णवे ब्रह्मणे नमः ।
अन्तकाय नमस्तुभ्यमुमायाः पतये नमः ॥ ३७॥

हिरण्यबाहवे साक्षाद्धिरण्यपतये नमः ।
शर्वाय सर्वरूपाय पुरुषाय नमो नमः ॥ ३८॥

सदसद्व्यक्तिहीनाय महतः कारणाय ते ।
नित्याय विश्वरूपाय जायमानाय ते नमः ॥ ३९॥

जाताय बहुधा लोके प्रभूताय नमो नमः ।
रुद्राय नीलरुद्राय कद्रुद्राय प्रचेतसे ॥ ४०॥

कालाय कालरूपाय नमः कालाङ्गहारिणे ।
मीढुष्टमाय देवाय शितिकण्ठाय ते नमः ॥ ४१॥

महीयसे नमस्तुभ्यं हन्त्रे देवारिणां सदा ।
ताराय च सुताराय तारणाय नमो नमः ॥ ४२॥

हरिकेशाय देवाय शम्भवे परमात्मने ।
देवानां शम्भवे तुभ्यं भूतानां शम्भवे नमः ॥ ४३॥

शम्भवे हैमवत्याश्च मन्यवे रुद्ररूपिणे ।
कपर्दिने नमस्तुभ्यं कालकण्ठाय ते नमः ॥ ४४॥

हिरण्याय महेशाय श्रीकण्ठाय नमो नमः ।
भस्मदिग्धशरीराय दण्डमुण्डीश्वराय च ॥ ४५॥

नमो ह्रस्वाय दीर्घाय वामनाय नमो नमः ।
नम उग्रत्रिशूलाय उग्राय च नमो नमः ॥ ४६॥

भीमाय भीमरूपाय भीमकर्मरताय ते ।
अग्रेवधाय वै भूत्वा नमो दूरेवधाय च ॥ ४७॥

धन्विने शूलिने तुभ्यं गदिने हलिने नमः ।
चक्रिणे वर्मिणे नित्यं दैत्यानां कर्मभेदिने ॥ ४८॥

सद्याय सद्यरूपाय सद्योजाताय ते नमः ।
वामाय वामरूपाय वामनेत्राय ते नमः ॥ ४९॥

अघोररूपाय विकटाय विकटशरीराय ते नामः ।
पुरुषरूपाय पुरुषैकतत्पुरुषाय वै नमः ॥ ५०॥

पुरुषार्थप्रदानाय पतये परमेष्ठिने ।
ईशानाय नमस्तुभ्यमीश्वराय नमो नमः ॥ ५१॥

ब्रह्मणे ब्रह्मरूपाय नमः साक्षाच्छिवाय ते ।
सर्वविष्णुर्नृसिंहस्य रूपमास्थाय विश्वकृत् ॥ ५२॥

हिरण्यकशिपुं हत्वा करजैर्निशितैः स्वयम् ।
दैत्येन्द्रैर्बहुभिः सार्धं हितार्थं जगतां प्रभुः ॥ ५३॥

सैंहीं समानयन्योनिं बाधते निखिलं जगत् ।
यत्कृत्यमत्र देवेश तत्कुरुष्व भवानिह ॥ ५४॥

उग्रोऽसि सर्वदुष्टानां नियन्तासि शिवोऽसि नः ।
कालकूटादिवपुषा त्राहि नः शरणागतान् ॥ ५५॥

शुक्रं तु वृत्तं विश्वेश क्रीडा वै केवलं वयम् ।
तवोन्मेषनिमेषाभ्यामस्माकं प्रलयोदयौ ॥ ५६॥

उन्मीलये त्वयि ब्रह्मन्विनाशोऽस्ति न ते शिव ।
सन्तप्ताः स्मो वयं देव हरिणामिततेजसा ॥ ५७॥

सर्वलोकहितायैनं तत्त्वं संहर्त्तुमिच्छसि ।

इति श्रीलिङ्गमहापुराणे पूर्वभागे पञ्चनवतितमाध्यायान्तर्गतं
देवैः कृतं नृसिंहस्तोत्रं समाप्तम् ।

लिङ्गपुराण । पूर्वभाग । अध्याय ९५/२२-३० ॥

lingapurANa . pUrvabhAga . adhyAya 95/22-30..

Proofread by PSA Easwaran

*Devaih Kritam Nrisimha Stotram*

pdf was typeset on October 8, 2024

Please send corrections to *sanskrit@cheerful.com*